# Shri Vagvadini Sahasranama Stotram

# श्रीवाग्वादिनिसहस्रनामस्तोत्रम्

## Document Information

Text title : vAgvAdinIsahasranAmastotoram

File name : vAgvAdinIsahasranAmastotoram.itx

Category : sahasranAma, devii, sarasvatI, devI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Description/comments : See corresponding nAmAvalI

Latest update : April 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 9, 2023

*sanskritdocuments.org*

# श्रीवाग्वादिनिसहस्रनामस्तोत्रम्

ॐ श्रीगणेशाय नमः ।

ब्रह्मोवाच -

नन्दिकेश्वर सर्वज्ञ भक्तानुग्रहकारक ।
ऋद्धिसिद्धिप्रदं नृणां सर्वदोषनिषूदनम् ॥ १॥

सर्वसिद्धिकरं पुण्यं सर्वकामार्थसाधनम् ।
आधिव्याधिहरं केन केन वा मृत्युनाशनम् ।
वक्तुमर्हसि देवेश नन्दिकेश सुरोत्तम ॥ २॥

श्रीनन्दिकेश्वरोवाच -

शृणु ब्रह्मन्प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
सर्वभक्तहितार्थाय कथिता कमलासन ॥ ३॥

समस्तकलहध्वंसी लोकस्य लोकवल्लभ ।
जलजास्स्थलजाश्चैव वनजा व्योमजास्तथा ॥ ४॥

कृत्रिमा दोषजाश्चापि भ्रान्तभ्रान्तिविनाशनम् ।
अपस्मारग्रहोन्मादजनोन्मत्तपिशाचकाः ॥ ५॥

दुःखप्रणाशनं नित्यं सुखं सम्प्राप्यते विधे ।
इदं स्तोत्रं न जानन्ति वाग्देवीस्मरणे यदि ॥ ६॥

न स सिद्धिमवाप्नोति वर्षकोटिशतैरपि ।
सर्वं सरस्वतीनाम्नां सदाशिवऋषिः स्मृतः ॥ ७॥

छन्दोऽनुष्टुप् तथा बीजं वाग्भवं शक्ति कीलकम् ।
रकारं सर्वकामार्थं विनियोगः प्रकीर्तिताः ॥ ८॥

अथ ध्यानं -

शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखण्डोज्ज्वलां
व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजैः ।

विभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां
वाग्देवीं विभवप्रदां त्रिनयनां सौभाग्यसम्पत्करीम् ॥

ॐ श्रीवाग्वादिनी वाणी वागीश्वरी सरस्वती ।
वाचा वाचामती वाक्या वाग्देवी बालसुन्दरी ॥ १॥

वचसा वाचयिष्या च वल्लभा विष्णुवल्लभा ।
बालरूपा सती वृद्धा वनमाली वनेश्वरी ॥ २॥

वलिध्वंसप्रिया वेदा वरदा वरवर्धिनी ।
ब्राह्मी सरस्वती विद्या ब्रह्माण्डज्ञानगोचरी ॥ ३॥

ब्रह्मनाडी ब्रह्मज्ञानी व्रति व्रतप्रिया व्रता ।
ब्रह्मचारी बुद्धिरूपी बुद्धिदा बुद्धिदापका ॥ ४॥

बुद्धिः प्रज्ञा बुद्धिमती बुद्धिश्री बुद्धिवर्धिनी ।
वाराही वारुणी व्यक्ता वेणुहस्ता बलीयसी ॥ ५॥

वाममार्गरता देवी वामाचाररसप्रिया ।
वामस्त्था वामरूपा च वर्धिनी वामलोचना ॥ ६॥

विश्वव्यापी विश्वरूपा विश्वस्था विश्वमोहिनी ।
विन्ध्यस्था विन्ध्यनिलया विन्दुदा विन्दुवासिनी ॥ ७॥

वक्रस्था वक्ररूपा च विज्ञानज्ञानदायिनी ।
विघ्नहर्त्री विघ्नदात्री विघ्नराजस्य वल्लभा ॥ ८॥

वासुदेवप्रिया देवी वेणुदत्तबलप्रदा ।
बलभद्रस्य वरदा बलिराजप्रपूजिता ॥ ९॥

वाक्यं वाचमती ब्राह्मी वाग्भवानी विधायिका ।
वायुरूपा च वागीशा वेगस्था वेगचारिणी ॥ १०॥

ब्रह्ममूर्तिर्वाङ्मयी च वार्ताज्ञा वङ्मयेश्वरी ।
बन्धमोक्षप्रदा देवी ब्रह्मनादस्वरूपिणी ॥ ११॥

वसुन्धरास्थिता देवी वसुधारस्वरूपिणी ।
वर्गरूपा वेगधात्री वनमालाविभूषणा ॥ १२॥

वाग्देवेश्वरकण्ठस्था वैद्या विबुधवन्दिता ।
विद्युत्प्रभा विन्दुमती वाञ्छिता वीरवन्दिता ॥ १३॥

वह्निज्वाला वह्निमुखी विश्वव्यापी विशालदा ।
विद्यारूपा च श्रीविद्या विद्याधरप्रपूजिता ॥ १४॥

विद्यास्था विद्यया देवी विद्यादेवी विषप्रहा ।
विषघ्नी विषदोषघ्नी वृक्षमूलप्रतिष्ठिता ॥ १५॥

वृक्षरूपी च वृक्षेशी वृक्षफलप्रदायका ।
विविधौषधसम्पन्ना विविधोत्पातनाशिनी ॥ १६॥

विधिज्ञा विविधाकारा विश्वगर्भा वनेश्वरी ।
विश्वेश्वरी विश्वयोनीर्विश्वमाता विधिप्रिया ॥ १७॥

विभूतिरूपा वैभूती वंशी वंशीधरप्रिया ।
विशाललोचना देवी वित्तदा च वरानना ॥ १८॥

वायुमण्डलसंस्था च वह्निमण्डलसंस्थिता ।
गङ्गादेवी च गङ्गा च गुणादात्री गुणात्मिका ॥ १९॥

गुणाश्रया गुणवती गुणशीलसमन्विता ।
गर्भप्रदा गर्भदात्री गर्भरक्षाप्रदायिनी ॥ २०॥

गीरूपा गीष्मती गीता गीतज्ञा गीतवल्लभा ।
गिरिधारीप्रिया देवी गिरिराजसुता सती ॥ २१॥

गतिदा गर्भदा गर्भा गणपूजा गणेश्वरी ।
गम्भीरा गहना गुह्या गन्धर्वगणसेविता ॥ २२॥

गुह्येश्वरी गुह्यकाली गुप्तमार्गप्रदायिनी ।
गुरुमूर्तिर्गुरुस्था च गोचरा गोचरप्रदा ॥ २३॥

गोपिनी गोपिका गौरी गोपालज्ञानतत्परा ।
गोरूपा गोमतीदेवी गोवर्धनधरप्रिया ॥ २४॥

गुणदात्री गुणशीला गुणरूपा गुणेश्वरी ।
गायत्रीरूपा गान्धारी गङ्गाधरप्रिया तथा ॥ २५॥

गिरिकन्या गिरिस्था च गूढरूपा गृहस्थिता ।
गृहक्लेशविध्वंसिनी गृहे कलहभञ्जनी ॥ २६॥

गगनाडी गर्भज्योतिर्गगनाकारशोभिता ।

गमसागमस्वरूपा च गरुडासनवल्लभा ॥ २७॥

गन्धरूपा गन्धरूपी गलस्था गलगोचरा ।
गजेन्द्रगामिनीदेवी ग्रहनक्षत्रवन्दिता ॥ २८॥

गोपकन्या गोकुलेशी गोपीचन्दनलेपिता ।
दयावती दुःखहन्त्री दुष्टदारिद्र्यनाशिनी ॥ २९॥

दिव्यदेहा दिव्यमुखी दिव्यचन्दनलेपिता ।
दिव्यवस्त्रपरीधाना दम्भलोभविवर्जिता ॥ ३०॥

दाता दामोदरप्रीता दामोदरपरायणा ।
दनुजेन्द्रविनाशी च दानवागणसेविता ॥ ३१॥

दुष्कृतघ्नी दूरगामी दुर्मति-दुःखनाशिनी ।
दावाग्निरूपिणीदेवी दशग्रीववरप्रदा ॥ ३२॥

दयानदी दयाशीला दानशीला च दर्शिनी ।
दृढदेवी दृढदृष्टी दुग्घप्रपानतत्परा ॥ ३३॥

दुग्धवर्णा दुग्धप्रिया दधिदुग्धप्रदायका ।
देवकी देवमाता च देवेशी देवपूजिता ॥ ३४॥

देवीमूर्तिर्दयामूर्तिर्दोषहा दोषनाशिनी ।
दोषघ्नी दोषदमनी दोलाचलप्रतिष्ठिता ॥ ३५॥

दैन्यहा दैत्यहन्त्री च देवारिगणमर्दिनी ।
दम्भकृत् दम्भनाशी च दाडिमीपुष्पवल्लभा ॥ ३६॥

दशना दाडिमाकारा दाडिमीकुसुमप्रभा ।
दासीवरप्रदा दीक्षा दीक्षिता दीक्षितेश्वरी ॥ ३७॥

दिलीपराजबलदा दिनरात्रिस्वरूपिणी ।
दिगम्बरी दीप्ततेजा डमरूभुजधारिणी ॥ ३८॥

द्रव्यरूपी द्रव्यकरी दशरथवरप्रदा ।
ईश्वरी ईश्वरभार्या च इन्द्रियरूपसंस्थिता ॥ ३९॥

इन्द्रपूज्या इन्द्रमाता ईप्सितफलदायका ।
इन्द्राणी  इङ्गितज्ञा च ईशानी ईश्वरप्रिया ॥ ४०॥

इष्टमूर्ती इहैवस्था इच्छारूपा इहेश्वरी ।
इच्छाशक्तिरीश्वरस्था इल्वदैत्यनिषूदिनी ॥ ४१॥

इतिहासादिशास्त्रज्ञा इच्छाचारीस्वरूपिणी ।
ईकाराक्षररूपा च इन्द्रियवरवर्धिनी ॥ ४२॥

इन्द्रलोकनिवासिना ईप्सितार्थप्रदायिनी ।
नारी नारायणप्रीता नारसिंही नरेश्वरी ॥ ४३॥

नर्मदा नन्दिनीरूपा नर्तकी नगनन्दिनी ।
नारायणप्रिया नित्यं नानाविद्याप्रदायिनी ॥ ४४॥

नानाशास्त्रधरीदेवी नानापुष्पसुशोभिता ।
नयनत्रयरूपा च नृत्यनाथस्य वल्लभा ॥ ४५॥

नदीरूपा नृत्यरूपा नागरी नगरेश्वरी ।
नानार्थदाता नलिनी नारदादिप्रपूजिता ॥ ४६॥

नतारम्भेश्वरीदेवी नीतिज्ञा च निरञ्जनी ।
नित्यसिंहासनस्था च नित्यकल्याणकारिणी ॥ ४७॥

नित्यानन्दकरी देवी नित्यसिद्धिप्रदायका ।
नेत्रपद्मदलाकारा नेत्रत्रयस्वरूपिणी ॥ ४८॥

नौमीदेवीनाममात्रा नकाराक्षररूपिणी ।
नन्दा निद्रा महानिद्रा नूपुरपदशोभिता ॥ ४९॥

नाटकी नाटकाध्यक्षा नरानन्दप्रदायिका ।
नानाभरणसन्तुष्टानानारत्नविभूषणा ॥ ५०॥

नरकनाशिनीदेवी नागान्तकस्थिता प्रिया ।
नीतिविद्याप्रदा देवी न्यायशास्त्रविशारदी ॥ ५१॥

नरलोकगतादेवी नरकासुरनाशिनी ।
अनन्तशक्तिरूपा च नैमित्तिकप्रपूजिता ॥ ५२॥

नानाशस्त्रधरादेवी नारबिन्दुस्वरूपिणी ।
नक्षत्ररूपा नन्दिता नगस्था नगनन्दिनी ॥ ५३॥

सारदा सरितारूपा सत्यभामा सुरेश्वरी ।
सर्वानन्दकरीदेवी सर्वाभरणभूषिता ॥ ५४॥

सर्वविद्याधरादेवी सर्वशास्त्रस्वरूपिणी ।
सर्वमङ्गलदात्री च सर्वकल्याणकारिणी ॥ ५५॥

सर्वज्ञा सर्वभाग्यं च सर्वसन्तुष्टिदायका ।
सर्वभारधरादेवी सर्वदेशनिवासिनी ॥ ५६ ॥

सर्वदेवप्रियादेवी सर्वदेवप्रपूजिता ।
सर्वदोषहरादेवी सर्वपातकनाशिनी ॥ ५७॥

सर्वसंसारसंराज्ञी सर्वसङ्कष्टनाशिनी । सर्वसंसारसाराणि
सर्वकलहविध्वंसी सर्वविद्याधिदेवता ॥ ५८॥

सर्वमोहनकारी च सर्वमन्त्रप्रसिद्धिदा ।
सर्वतन्त्रात्मिकादेवी सर्वयन्त्राधिदेवता ॥ ५९॥

सर्वमण्डलसंस्था च सर्वमायाविमोहिनी ।
सर्वहृदयवासिन्या सर्वमात्मस्वरूपिणी ॥ ६०॥

सर्वकारणकारी च सर्वशान्तस्वरूपिणी ।
सर्वसिद्धिकरस्था च सर्ववाक्यस्वरूपिणी ॥ ६१॥

सर्वाधारा निराधारा सर्वाङ्गसुन्दरी सती ।
सर्ववेदमयीदेवी सर्वशब्दस्वरूपिणी ॥ ६२॥

सर्वब्रह्माण्डव्याप्ता च सर्वब्रह्माण्डवासिनी ।
सर्वाचाररता साध्वी सर्वबीजस्वरूपिणी ॥ ६३॥

सर्वोन्मादविकारघ्नी सर्वकल्मषनाशिनी ।
सर्वदेहगतादेवी सर्वयोगेश्वरी परा ॥ ६४॥

सर्वकण्ठस्थिता नित्यं सर्वगर्भासुरक्षका ।
सर्वभावा प्रभावाद्या सर्वलक्ष्मीप्रदायिका ॥ ६५॥

सर्वैश्वर्यप्रदा देवी सर्ववायुस्वरूपिणी ।
सुरलोकगता देवी सर्वयोगेश्वरी परा ॥ ६६॥

सर्वकण्ठस्थिता नित्यं सुरासुरवरप्रदा ।
सूर्यकोटिप्रतीकाशा सूर्यमण्डलसंस्थिता ॥ ६७॥

शून्यमण्डलसंस्था च सात्त्विकी सत्यदा तथा ।

सरिता सरिताश्रेष्ठा सदाचारसुशोभिता ॥ ६८॥

साकिनी साम्यरूपा च साध्वी साधुजनाश्रया ।
सिद्धिदा सिद्धिरूपा च सिद्धिस्सिद्धिविवर्धिनी ॥ ६९॥

श्रितकल्याणदादेवी सर्वमोहाधिदेवता ।
सिद्धेश्वरी च सिद्धात्मा सर्वमेधाविवर्धिनी ॥ ७०॥

शक्तिरूपा च शक्तेशी श्यामा कष्टनिषूदिनी ।
सर्वभक्षा शङ्खिनी च सरसागतकारिणी ॥ ७१॥

सर्वप्रणवरूपा च सर्व अक्षररूपिणी ।
सुखदा सौख्यदा भोगा सर्वविघ्नविदारिणी ॥ ७२॥

सन्तापहा सर्वबीजा सावित्री सुरसुन्दरी ।
श्रीरूपा श्रीकरी श्रीश्च शिशिराचलवासिनी ॥ ७३॥

शैलपुत्री शैलधात्री शरणागतवल्लभा ।
रत्नेश्वरी रत्नप्रदा रत्नमन्दिरवासिनी ॥ ७४॥

रत्नमालाविचित्राङ्गी रत्नसिंहासनस्थिता ।
रसधाररसरता रसज्ञा रसवल्लभा ॥ ७५॥

रसभोक्त्री रसरूपा षड्रसज्ञा रसेश्वरी ।
रसेन्द्रभूषणा नित्यं रतिरूपा रतिप्रदा ॥ ७६॥

राजेश्वरी राकिणी च रावणावरदायका । दशास्यवरदायका
रामकान्ता रामप्रिया रामचन्द्रस्य वल्लभा ॥ ७७॥

राक्षसघ्नी राजमाता राधा रुद्रेश्वरी निशा ।
रुक्मिणी रमणी रामा राज्यभुग्राज्यदायका ॥ ७८॥

रक्ताम्बरधरादेवी रकाराक्षररूपिणी ।
रासिस्था रामवरदा राज्यदा राज्यमण्डिता ॥ ७९॥

रोगहा लोभहा लोला ललिता ललितेश्वरी ।
तन्त्रिणी तन्त्ररूपा च तत्त्वी तत्त्वस्वरूपिणी ॥ ८०॥

तपसा तापसी तारा तरुणानङ्गरूपिणी ।
तत्त्वज्ञा तत्त्वनिलया तत्त्वालयनिवासिनी ॥ ८१॥

तमोगुणप्रदादेवी तारिणी तन्त्रदायिका ।
तकाराक्षररूपा च तारकाभयभञ्जनी ॥ ८२॥

तीर्थरूपा तीर्थसंस्था तीर्थकोटिफलप्रदा ।
तीर्थमाता तीर्थज्येष्ठा तरङ्गतीर्थदायका ॥ ८३॥

त्रैलोक्यजननीदेवी त्रैलोक्यभयभञ्जनी ।
तुलसी तोतला तीर्था त्रिपुरा त्रिपुरेश्वरी ॥ ८४॥

त्रैलोक्यपालकध्वंसी त्रिवर्गफलदायका ।
त्रिकालज्ञा त्रिलोकेशी तृतीयज्वरनाशिनी ॥ ८५॥

त्रिनेत्रधारी त्रिगुणा त्रिसुगन्धिविलेपिनी ।
त्रिलौहदात्री गम्भीरा तारागणविलासिनी ॥ ८६॥

त्रयोदशगुणोपेता तुरीयमूर्तिरूपिणी ।
ताण्डवेशी तुङ्गभद्रा तुष्टिस्त्रेतायुगप्रिया ॥ ८७॥

तरङ्गिणी तरङ्गस्था तपोलोकनिवासिनी ।
तप्तकाञ्चनवर्णाभा तपःसिद्धिविधायिनी ॥ ८८॥

त्रिशक्तिस्त्रिमधुप्रीता त्रिवेणी त्रिपुरान्तका ।
पद्मस्था पद्महस्ता च परत्रफलदायका ॥ ८९॥

परमात्मा पद्मवर्णा परापरतराष्टमा ।
परमेष्ठी परञ्ज्योतिः पवित्रा परमेश्वरी ॥ ९०॥

पारकर्त्री पापहन्त्री पातकौघविनाशिनी ।
परमानन्ददादेवी प्रीतिदा प्रीतिवर्द्धिनी ॥ ९१॥

पुण्यनाम्नी पुण्यदेहा पुष्टिपुस्तकधारिणी ।
पुत्रदात्री पुत्रमाता पुरुषार्थपुरेश्वरी ॥ ९२॥

पौर्णमीपुण्यफलदा पङ्कजासनसंस्थिता ।
पृथ्वीरूपा च पृथिवी पीताम्बरस्य वल्लभा ॥ ९३॥

पाठादेवी च पठिता पाठेशी पाठवल्लभा ।
पन्नगान्तकसंस्था च परार्धाङ्गोश्वपद्धती ॥ ९४॥

हंसिनी हासिनीदेवी हर्षरूपा च हर्षदा ।
हरिप्रिया हेमगर्भा हंसस्था हंसगामिनी ॥ ९५॥

हेमालङ्कारसर्वाङ्गी हैमाचलनिवासिनी ।
हुत्वा हसितदेहा च हाहा हूहू सदाप्रिया ॥ ९६॥

हंसरूपा हंसवर्णा हिता लोकत्रयेश्वरी ।
हुङ्कारनादिनीदेवी हुतभुक्ता हुतेश्वरी ॥ ९७॥

ज्ञानरूपा च ज्ञानज्ञा ज्ञानदा ज्ञानसिद्धिदा ।
ज्ञानेश्वरी ज्ञानगम्या ज्ञानी ज्ञानविशालधीः ॥ ९८॥

ज्ञानमूर्तिर्ज्ञानधात्री ज्ञातव्याकरणादिनी ।
अज्ञाननाशिनीदेवी ज्ञाता ज्ञानार्णवेश्वरी ॥ ९९॥

महादेवी महामोहा महायोगरता तथा ।
महाविद्या महाप्रज्ञा महाज्ञाना महेश्वरी ॥ १००॥

मञ्जुश्री मञ्जुरप्रीता मञ्जुघोषस्य वन्दिता ।
महामञ्जुरिकादेवी मणीमुकुटशोभिता ॥ १०१॥

मालाधरी मन्त्रमूर्तिर्मदनी मदनप्रदा ।
मानरूपा मनसी च मतिर्मतिमनोत्सवा ॥ १०२॥

मानेश्वरी मानमान्या मधुसूदनवल्लभा ।
मृडप्रिया मूलसंस्था मूर्ध्निस्था मुनिवन्दिता ॥ १०३॥

मुखबेक्ता मूढहन्ता मृत्युर्भयविनाशिनी ।
मृत्रिका मातृका मेधा मेधावी माधवप्रिया ॥ १०४॥

मकाराक्षररूपा च मणिरत्नविभूषिता ।
मन्त्राराधनतत्त्वज्ञा मन्त्रयन्त्रफलप्रदा ॥ १०५॥

मनोद्भवा मन्दहासा मङ्गला मङ्गलेश्वरी ।
मौनहन्त्री मोददात्री मैनाकपर्वते स्थिता ॥ १०६॥

मणिमती मनोज्ञा च माता मार्गविलासिनी ।
मूलमार्गरतादेवी मानसा मानदायिनी ॥ १०७॥

भारती भुवनेशी च भूतज्ञा भूतपूजिता ।
भद्रगङ्गा भद्ररूपा भुवना भुवनेश्वरी ॥ १०८॥

भैरवी भोगदादेवी भैषज्या भैरवप्रिया ।

भवानन्दा भवातुष्टी भाविनी भरतार्चिता ॥ १०९॥

भागीरथी भाष्यरूपा भाग्या भाग्यवतीति च ।
भद्रकल्याणदादेवी भ्रान्तिहा भ्रमनाशिनी ॥ ११०॥

भीमेश्वरी भीतिहन्त्री भवपातकभञ्जनी ।
भक्तोत्सवा भक्तप्रिया भक्तस्था भक्तवत्सला ॥ १११॥

भञ्ज्ञा च भूतदोषघ्नी भवमाता भवेश्वरी ।
भयहा भग्नहा भव्या भवकारणकारिणी ॥ ११२॥

भूतैश्वर्यप्रदा देवी भूषणाङ्की भवप्रिया ।
अनन्यज्ञानसम्पन्ना अकाराक्षररूपिणी ॥ ११३॥

अनन्तमहिमा त्र्यक्षी अजपामन्त्ररूपिणी ।
अनेकसृष्टिसम्पूर्णा अनेकाक्षरज्ञानदा ॥ ११४॥

आनन्ददायिनी देवी अमृता अमृतोद्भवा ।
आनन्दिनी च अरिहा अन्नस्था अग्निवच्छविः ॥ ११५॥

अत्यन्तज्ञानसम्पन्ना अणिमादिप्रसिद्धिदा ।
आरोग्यदायिनी आढ्या आदिशक्तिरभीरुहा ॥ ११६॥ आज्ञा

अगोचरी आदिमाता अश्वत्थवृक्षवासिनी ।
धर्मावती धर्मधरी धरणीधरवल्लभा ॥ ११७॥

धारणा धारणाधीशा धर्मरूपधराधरी ।
धर्ममाता धर्मकर्त्री धनदा च धनेश्वरी ॥ ११८॥

ध्रुवलोकगता धाता धरित्री धेनुरूपधृक् ।
धीरूपा धीप्रदा धीशा धृतिर्वाक्सिद्धिदायका ॥ ११९॥

धैर्यकृद्धैर्यदा धैर्या धौतवस्त्रेण शोभिता ।
धुरन्धरी धुन्धिमाता धारणाशक्तिरूपिणी ॥ १२०॥

वैकुण्ठस्था कण्ठनिलया कामदा कामचारिणी ।
कामधेनुस्वरूपा च कष्टकल्लोलहारिणी ॥ १२१॥

कुमुदहासिनी नित्यं कैलासपददायका ।
कमला कमलस्था च कालहा क्लेशनाशिनी ॥ १२२॥

कलाषोडशसंयुक्ता कङ्काली कमलेश्वरी ।
कुमारी कुलसन्तोषा कुलज्ञा कुलवर्द्धिनी ॥ १२३॥

कालकूटविषध्वंसी कमलापतिमोहनी ।
कुम्भस्था कलशस्था च कृष्णवक्षोविलासिनी ॥ १२४॥

कृत्यादिदोषहा कुन्ती कस्तूरीतिलकप्रिया ।
कर्पुरवासितादेहा कर्पूरमोदधारिणी ॥ १२५॥

कुशस्था कुशमूलस्था कुब्जा कैटभनाशिनी ।
कुरुक्षेत्रकृता देवी कुलश्री कुलभैरवी ॥ १२६॥

कृतब्रह्माण्डसर्वेशी काली कङ्कणधारिणी ।
कुबेरपूजिता देवी कण्ठकृत्कण्ठकर्षणी ॥ १२७॥

कुमुदःपुष्पसन्तुष्टा किङ्किणीपादभूषिणी ।
कुङ्कुमेन विलिप्ताङ्गी कुङ्कुमद्रवलेपिता ॥ १२८॥

कुम्भकर्णस्य भ्रमदा कुञ्जरासनसंस्थिता ।
कुसुममालिकावेत्री कौशिकीकुसुमप्रिया ॥ १२९॥

यज्ञरूपा च यज्ञेशी यशोदा जलशायिनी ।
यज्ञविद्या योगमाया जानकी जननी जया ॥ १३०॥

यमुनाजपसन्तुष्टा जपयज्ञफलप्रदा ।
योगधात्री योगदात्री यमलोकनिवारिणी ॥ १३१॥

यशःकीर्तिप्रदा योगी युक्तिदा युक्तिदायनी ।
जैवनी युगधात्री च यमलार्जुनभञ्जनी ॥ १३२॥

जृम्भन्यादिरतादेवी जमदग्निप्रपूजिता ।
जालन्धरी जितक्रोधा जीमूतैश्वर्यदायका ॥ १३३॥

क्षेमरूपा क्षेमकरी क्षेत्रदा क्षेत्रवर्धिनी ।
क्षारसमुद्रसंस्था च क्षीरजा क्षीरदायका ॥ १३४॥

क्षुधाहन्त्री क्षेमधात्री क्षीरार्णवसमुद्भवा ।
क्षीरप्रिया क्षीरभोजी क्षत्रियकुलवर्द्धिनी ॥ १३५॥

खगेन्द्रवाहिनी खर्व खचारीणी खगेश्वरी ।
खरयूथविनाशी च खड्गहस्ता च खञ्जना ॥ १३६॥

षट्चक्राधारसंस्था च षट्चक्रस्याधिदेवता ।
षडङ्गज्ञानसम्पन्ना खण्डचन्द्रार्धशेखरा ॥ १३७॥

षट्कर्मरहिता ख्याता खरबुद्धिनिवारिणी ।
षोडशाधारकृद्देवी षोडशभुजशोभिता ॥ १३८॥

षोडशमूर्तीषोडश्या खड्गखेटकधारिणी ।
घृतप्रिया घर्घरिका घुर्घुरीनादशोभिता ॥ १३९॥

घण्टानिनादसन्तुष्टा घण्टाशब्दस्वरूपिणी ।
घटिकाघटसंस्था च घ्राणवासी घनेश्वरी ॥ १४०॥

चारुनेत्रा चारुवक्त्रा चतुर्बाहुश्चतुर्भुजा ।
चञ्चला चपला चित्रा चित्रिणी चित्ररञ्जिनी ॥ १४१॥

चन्द्रभागा चन्द्रहासा चित्रस्था चित्रशोभना ।
चित्रविचित्रमाल्याङ्गी चन्द्रकोटिसमप्रभा ॥ १४२॥

चन्द्रमा च चतुर्वेदा प्रचण्डा चण्डशेखरी ।
चक्रमध्यस्थिता देवी चक्रहस्ता च चक्रिणी ॥ १४३॥

चन्द्रचूडा चारुदेहा चण्डमुण्डविनाशिनी ।
चण्डेश्वरी चित्रलेखा चरणे नूपुरैर्युता ॥ १४४॥

चैत्रादिमासरूपा सा चामरभुजधारिणी ।
चार्वङ्गा चर्चिका दिव्या चम्पादेवी चतुर्थचित् ॥ १४५॥

चतुर्भुजप्रिया नित्यं चतुर्वर्णफलप्रदा ।
चतुस्सागरसङ्ख्याता चक्रवर्तिफलप्रदा ॥ १४६॥

छत्रदात्री छिन्नमस्ता छलमध्यनिवासिनी ।
छायारूपा च छत्रस्था छुरिकाहस्तधारिणी ॥ १४७॥

उत्तमाङ्गी उकारस्था उमादेवीस्वरूपिणी ।
ऊर्ध्वाम्नायी उर्ध्वगाम्या ॐकाराक्षररूपिणी ॥ १४८॥

एकवक्त्रा देवमाता ऐन्द्री ऐश्वर्यदायका ।
औषधीशा चौषधीकृत् ओष्टस्था ओष्टवासिनी ॥ १४९॥

स्थावरस्था स्थलचरा स्थितिसंहारकारिका ।

रुं रुं शब्दस्वरूपा च रुङ्काराक्षररूपिणी ॥ १५० ॥

आयुर्दा अद्भुतप्रदा आम्नायषड्वरूपिणी ।
अन्नपूर्णा अन्नदात्री आशा सर्वजनस्य च ॥ १५१ ॥

आर्तिहारी च अस्वस्था अशेषगुणसंयुता ।
शुद्धरूपा सुरूपा च सावित्री साधकेश्वरी ॥ १५२ ॥

बालिका युवती वृद्धा विश्वासी विश्वपालिनी ।
फकाररूपा फलदा फलवन्निर्फलप्रदा ॥ १५३ ॥

फणीन्द्रभूषणा देवी फकारक्षररूपिणी ।
ऋद्धिरूपी ऋकारस्था ऋणहा ऋणनाशिनी ॥ १५४ ॥

रेणुराकाररमणी परिभाषा सुभाषिता ।
प्राणापानसमानस्थोदानव्यानौ धनञ्जया ॥ १५५ ॥

कृकरा वायुरूपा च कृतज्ञा शङ्खिनी तथा ।
कूर्मनाम्न्युन्मीलनकरी जिह्वकस्वादुमीलना ॥ १५६ ॥

जिह्वारूपा जिह्वसंस्था जिह्वास्वादुप्रदायका ।
स्मृतिदा स्मृतिमूलस्था श्लोककृच्छ्लोकराशिकृत् ॥ १५७ ॥

आधारे संस्थिता देवी अनाहतनिवासिनी ।
नाभिस्था हृदयस्था च भ्रूमध्ये द्विदले स्थिता ॥ १५८ ॥

सहस्रदलसंस्था च गुरुपत्नीस्वरूपिणी ।
फलश्रुतिः -
इति ते कथितं प्रश्नं नाम्ना वाग्वादिनी परम् ॥ १५९ ॥

सहस्रं तु महागोप्यं देवानामपि दुर्लभम् ।
न प्रकाश्यं मयाऽऽख्यातं तव स्नेहेन आत्मभूः ॥ १६० ॥

एककालं द्विकालं वा त्रिकालं वापि भक्तितः ।
न तेषां दुर्लभं किञ्चित् त्रिषु लोकेषु वल्लभ ॥ १६१ ॥

साधकाभीष्टदो ब्रह्मा सर्वविद्याविशारदः ।
त्रिवारं यः पठिष्यति नरः शक्तिधरो भवेत् ॥ १६२ ॥

पञ्चधा भाग्यमाप्नोति सप्तधा धनवान्भवेत् ।
नवमैश्वर्यमाप्नोति साधकश्शुद्धचेतसा ॥ १६३ ॥

पठेदेकादशो नित्यं स सिद्धिभाजनो भवेत् ।
मासमेकं पठित्वा तु भवेद्योगीश्वरोपमः ॥ १६४॥

मासषट्कं पठेद्धीमान्सर्वविद्या प्रजायते ।
वत्सरैकं पठेद्यो मां साक्षात्सर्वाङ्गतत्त्ववित् ॥ १६५॥

गोरोचनाकुङ्कुमेन विलिखेद्भूर्जपत्रके ।
पूजयित्वा विधानेन देवीं वागीश्वरीं जपेत् ॥ १६६॥

सहस्रवारपठनान्मूकोऽपि सुकविर्भवेत् ।
पञ्चम्यां च दशम्यां च पूर्णमास्यामथापि वा ॥ १६७॥

गुरोराराधनतत्त्वेनार्चयेद्भक्तिभावतः ।
जडं हन्ति गदं हन्ति वान्तिभ्रान्तिविनाशनम् ॥ १६८॥

बुद्धि मेधा प्रवर्धते आरोग्यं च दिने दिने ।
अपमृत्युभयं नास्ति भूतवेतालडकिनी- ॥ १६९॥

राक्षसीग्रहदोषघ्नं कलिदोषनिवारणम् ।
आधिव्याधिजलोन्मग्न अपस्मारं न बाधते ॥ १७०॥

प्रातःकाले पठेन्नित्यमुन्मादश्च विनश्यति ।
मेधाकान्तिस्मृतिदा भोगमोक्षमवाप्यते ॥ १७१॥

महाव्याधिर्महामूठनिर्मूलनं भवेतत्क्षणात् ।
विद्यारम्भे च वादे च विदेशगमने तथा ॥ १७२॥

यात्राकाले पठेद्यदि विजयं नात्र संसयः ।
सिद्धमूली तथा ब्राह्मी उग्रगन्धा हरीतकी ॥ १७३॥

चतुर्द्रव्यसमायुक्तं भक्तियुक्तेन मानसा ।
ब्राह्मणेन लभेद्विद्या राज्यं च क्षत्रियो लभेत् ॥ १७४॥

वैश्यो वाणिज्यसिद्धिं च शूद्रेषु चिरजीवितः ।
वाग्वादिनीसरस्वत्यास्सहस्रन्नाम यस्मरेत् ॥ १७५॥

तस्य बुद्धिः स्थिरा लक्ष्मी जायते नात्र संशयः ।
यं यं कामयते मर्त्यस्तं तं प्राप्नोति नित्यशः ॥ १७६॥

अतःपरं किमुक्तेन परमेष्टिन् महामते ।

सर्वान्कामान्लभेत्सद्यः लोकवश्यं तिकारकः ॥ १७७॥

षट्कर्मं च महासिद्धिमन्त्रयन्त्रादिगीश्वरः ।
कामक्रोधादहङ्कारदम्भलोभं विनश्यति ॥ १७८॥

पुरुषार्थी भवेद्विद्वान् विजित्वा तु महीतले ।
नातःपरतरं स्तोत्रं सरस्वत्या पितामह ॥ १७९॥

न देयं परशिष्येभ्यो भक्तिहीनाय निन्दके ।
सुभक्तेभ्यो सुशिष्येभ्यो देयं देयं न संशयः ॥ १८०॥

इदं स्तोत्रं पठित्वा तु यत्र यत्रैव गच्छति ।
कार्यसिद्धिश्च जायते निर्विघ्नं पुनरागमः ॥ १८१॥

इति श्रीभविष्योत्तरपुराणे श्रीनन्दिकेश्वरब्रह्मासंवादे
सर्वाधारसमये हृदयाकर्षणकारणे
वाग्वादिनीसहस्रनामस्तोत्रं सम्पूर्णम् ।
शुभमस्तु ।

संवत १८५१ फल्गुनमासे कृष्णपक्षे नवम्यां सौम्यवासरे
सहस्रनाम लिखितं, तुलसीब्राह्मण यथाप्रत्यर्हं च लिखितम् ॥

श्रीं श्रीं श्रीं श्रीं श्रीं श्रीं श्रीं श्रीं श्रीं श्रीं

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri Vagvadini Sahasranama Stotram*
pdf was typeset on April 9, 2023

Please send corrections to *sanskrit@cheerful.com*